## १९. नवग्रह स्तोत्रम्

भास्वान्मे भासयेत्तत्त्वं चंद्रश्चाह्लादकृद्भवेत् ।
मंगलो मंगलं दद्यात् बुधश्च बुधतां दिशेत् ।१।

गुरुर्मे गुरुतां दद्यात् कविश्च कवितां दिशेत् ।
शनिश्च शं प्रापयतु केतुः केतुं जयेऽर्पयेत् ।२।

राहुर्मे राहयेद्रोगं ग्रहाः संतुकरग्रहाः ।
नवं नवं ममैश्वर्यं दिशंत्वेते नवग्रहाः ।३।

शने दिनमणेः सूनो ह्यनेकगुणसन्मणे ।
अरिष्टं हर मेऽभीष्टं कुरु मा कुरु संकटम् ।४।

हरेरनुग्रहार्थाय शत्रूणां निग्रहाय च ।
वादिराजयतिप्रोक्तं ग्रहस्तोत्रं सदा पठेत् ।५।

॥इति श्रीमद् वादिराजयतिकृतं नवग्रहस्तोत्रं संपूर्णम्॥